# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा –नवेम्बर-दिसम्बर, २०१६

| | | |
|---|---|---|
| कक्षा – आचार्यप्रथमवर्षम् (SEM-1) | **प्रश्नपत्रम् –५** | गुणाः – ७० |
| विषयः – फलितज्योतिषम् | **कोड – C.E.4.1.1** | समयः – ०३:००-०६:०० |
| दिनाङ्कः -०९-१२-१६ | सन्दर्भग्रन्थः – सरलजन्मपत्रीविज्ञानम् | |

---

**प्रथमान्वितिः (Unit-1)**

**प्रश्नः – १ अधोलिखितयोः एकस्य सान्वयं व्याख्या कार्या।** ०४

(१) स्वदेशसूर्योदयतोऽत्र वारे सर्वेषु कार्येषु नियोजनीयः।
लंकोदयाद्यस्ति दिनप्रवृत्तिस्तत प्रयोज्याः किल कालहोरा ॥

(२) तिथेः पञ्चदशो भागः क्षणसंज्ञाः तिथिः स्मृता॥
तत् तत् तिथि समारभ्य गण्याः पंचदशक्रमात्॥
तासु तिथ्युक्तकर्माणि बुधै कार्याणि यत्नतः।
यतः स्थूलतिथैः सूक्ष्म प्रबला कथिता बुधै॥

**प्रश्नः – २ अधोलिखितयोः कस्यचिदेकस्योपरि निबन्धं निबन्धयत।** १२

(१) नक्षत्राणां आकृतिः एवं शुभाशुभनक्षत्रविचाः

(२) सप्तवारकार्याणि

**प्रश्नः – ३ निम्नलिखितेषु टिप्पणीद्वयं लिखत।** ०४

(१) तिथिदोषपरिहारः

(२) अमावस्याभेदः

(३) पक्षरन्ध्रतिथयः

**द्वितीयान्वितिः (Unit-2)**

**प्रश्नः – ४ अधोलिखितयोः एकस्य ससन्दर्भं व्याख्या कार्या।** ०४

(१) अनुक्तत्वादृकारस्य रेफो ग्राह्यो विचक्षणैः।
ऋद्धिनाथास्य नक्षत्र यथा चित्राख्यमेद हि ॥

(२) विनष्टार्थस्य लाभोऽन्धे शीघ्रं मन्दे प्रयत्नतः।
स्याद् दूरे श्रवणं मध्ये श्रुत्याप्ति न सुलोचने॥

**प्रश्नः – ५ अधोलिखितयोः प्रश्नयोः कस्यचिदेकस्योपरि निबन्धं लिखत।** १२

(१) राशिनां परिज्ञानं कथं करणीयम्? नक्षत्राणुसारं सविस्तरं वर्णयत।

(२) गर्भाधानः कदा करणीयम् इति विलिख्य नामाकरणमुहूर्तस्यापि प्रतिपादनं कुरुत।

**प्रश्नः – ६ अधोनिर्दिष्टेषु टिप्पणीद्वयं लिखत।** ०४

(१) करणानां अधिपाः के?

(२) नक्षत्राणाम् अन्धादिसंज्ञा

(३) उपनयने कदा गुरुः श्रेष्ठः भवति?

## तृतीयान्वितिः (Unit-3)

**प्रश्नः – ७ अधोलिखितयोः एकस्य ससन्दर्भं व्याख्या कार्या।** ०४

(१) मृत्यु: षडष्टके ज्ञेयोऽपत्यहानिर्नवात्मजे।
द्विर्द्वादशे दरिद्रत्वं द्वयोरन्यत्र सौख्यकृत्॥

(२) अर्कोत्तरे वायुदिशां च सोमे भौमे प्रतीच्यां बुधे च नैऋते।
याम्ये गुरौ वह्निदिशां च शुक्रेमन्दे चा पूर्वे प्रवदन्ति कालम्॥

**प्रश्नः – ८ अधोलिखितयोः प्रश्नयोः कस्यचिदेकस्योपरि निबन्धं लिखत।** ०८

(१) विवाहे नाडीगणयो: विचार: कथं क्रियते? परिहारसहितं वर्णयत।

(२) मंगलदोषपरिहारः कथं भवति? सोदाहरणं व्याख्यायत।

**प्रश्नः – ९ अधोनिर्दिष्टेषु त्रयाणाम् अतिलघूत्तरं यच्छत।** ०३

(१) गणैक्यस्य किं फलम्?

(२) कवर्गस्य स्वामि क:?

(३) विवाहदिवसात् कस्मिन् दिवसे वधूप्रवेश करणीय: ?

(४) मंगलदोषः कदा भवति ?

(५) योगिनी कदा सुखदा भवति?

## चतुर्थान्वितिः (Unit-४)

**प्रश्नः – १० अधोलिखितयोः एकस्य ससन्दर्भं व्याख्या कार्या।** ०४

(१) सन्धिखेटान्तरं कार्यं यच्छेषं नखसङ्गुणम्।
भावसन्ध्यन्तरेणाप्तं फलं विंशोपका स्मृता:॥

(२) षड् दश सप्ताष्टादश षोडश नवेन्दवो मुनिशशङ्काः।
सप्त नखा वर्षाणि हि रव्यादिनां यथाक्रमत:॥

**प्रश्नः – ११ अधोलिखितयोः प्रश्नयोः कस्यचिदेकस्य साधनं कुरुत।** ०८

(१) ससूत्रंस्पष्टचन्द्रसाधनम्

(२) दशमलग्नसाधनम्

**प्रश्नः – १२ निम्नलिखितेषु त्रयाणाम् अतिलघूत्तरं यच्छत।** ०३

(१) इष्टकालस्य कोऽर्थ: ?

(२) दशमलग्नसाधने कस्य प्रयोग: भवति?

(३) बुधस्य दशावर्षं कति ?

(४) नवमांशात् कस्य विचारः क्रियते ?

(५) एकस्मिन् द्रेष्काणे कति अंशा: भवन्ति ?

***